५९१

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

पञ्चदशं

गणेशतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारः १८६७ साधिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

500

श्रीगणेशाय नमः ।

शाक्तप्रमोदः ।

अथ गणेशतन्त्रम् ।

अथश्रीगणेशध्यानम् ।


नवरत्नमयन्द्वीपंस्मरेदिक्षुरसाम्बुधौ ॥ तद्वीचिधौतपर्यन्तम्म न्दमारुतसेवितम् ॥ १ ॥ मन्दारपारिजातादिकल्पवृक्षलताकुल म् ॥ उद्भूतरत्नच्छायाभिररुणीकृतभूतलम् ॥ २ ॥ उद्यदिनकरे न्दुभ्यामुद्भासितदिगन्तरम् ॥ तस्यमध्येपारिजातन्नवरत्नमयंस्म रेत् ॥ ३ ॥ ऋतुभिःसेवितंषड्भिरनिशम्प्रीतिवर्द्धनैः ॥ तस्याध स्तान्महापीठेरचितेमातृकाम्बुजे ॥४॥षट्कोणान्तस्त्रिकोणाढच म्महागणपतिंस्मरेत् ॥ ५॥ हस्तीन्द्राननमिन्दुचूडमरुणच्छाय न्त्रिनेत्रंरसादाश्लिष्टम्प्रिययासपद्मकरयास्वाङ्कस्थयांसन्ततम् ॥ बीजापूरगदाधनुस्त्रिशिखियुक्चक्राब्जपाशोत्पलङ्कआभैःस्वावि षाणरत्नकलशौहस्तैर्व्वहन्तम्भजे ॥६॥गण्डपालीगलद्दानपूरला लसमानसान् ॥द्विरेफान्कर्णतालाभ्यांवारयन्तम्मुहुर्म्मुहुः ॥७॥ कराग्रधृतमाणिक्यकुम्भवक्त्रविनिस्सृतैः ॥रत्नवर्ष्यैःप्रीणयन्तंसा

धकम्मदविह्वलम् ॥८॥माणिक्यमुकुटोपेतंरत्नाभरणभूषितम् ॥



अथयन्त्रोद्धारः ।

षट्कोणञ्चत्रिकोणञ्चतद्बहिःअन्यत्सर्व्वम्मातृकायन्त्रवत् ॥



अथमन्त्रोद्धारः ।

श्रीशक्तिस्मरभूविघ्नबीजानिप्रथमञ्चेदत् ॥ ङेन्तङ्गणपतिम्प श्चाद्वरान्तेवरदम्परम् ॥ उक्त्वासर्व्वजनम्मेन्तेवशमानयठद्वय म् ॥ अष्टाविंशत्यक्षरोयन्ताद्योमनुरीरितः ॥

अथमन्त्रः ।

ॐ श्रीं ह्रींक्लीं ग्लौंगंगणपतयेवरवरदसर्व्वजनम्मेवशमानयठःठः।

अथपूजाप्रयोगः ।

प्रातरकृत्यादिपीठन्यासान्तँविधायपूर्व्वोक्तपीठशक्तीर्व्विन्यस्य ॥ तद्यथा ॥ केसरेषुमध्येच ॥ तीव्रायै० ज्वालिन्यै० नन्दायै० भोगदायै० कामरूपिण्यै० उग्रायै० तेजोवत्यै० सत्याय० विघ्ननाशिन्यै० तदुपरिमध्येसर्व्वशक्तिकमलासनायनमः ॥ सर्व्वत्रप्रणवादिनमोऽन्तेनपूजयेत् ॥ ततऋष्यादिन्यासमाचरेत् ॥ शिरसिगणकऋषयेनमः ॥ मुखेनिचृद्गायत्रीछन्दसेनमः ॥ हृदि गणपतयेदेवतायैनमः ॥ ततरकराङ्गन्यासौ ॥ ॐ श्रींह्रींक्लीं ग्लौंगंगांअङ्गुष्ठाभ्यान्नमः ॥ ॐ श्रींह्रींक्लींग्लौंगंगींतर्ज्जनीभ्यां स्वाहा ॥६॥ एवंगूंमध्यमाभ्याँव्वषट् ॥६॥ गैंअनामिकाभ्यांहूम् ॥६॥ गौंकनिष्ठाभ्याँव्वषट् ॥६॥ गरकरतलकरपृष्ठाभ्याम्फट् ॥ एवंहृदयादिषु ॥ केचित्तु ॐ गांहृदयायनमःश्रींगींशिरसेस्वाहेतितत्त्वषड्वीजस्थस्वबीजेनदीर्घभाजाप्रकल्पयेत् ॥इतिवचनाद्विशिष्टस्यैवग्रहणात् ॥

अथषोडशोपचारक्रमेणपूजाविधिः ।

अथध्यानम्॥एकदन्तंशूर्प्पकर्ण्णङ्गजवक्त्रंचतुर्भुजम्॥पाशाङ्कुशधरन्देवम्मोदकान्बिभ्रतङ्करैः॥रक्तपुष्पमयीम्मालाङ्कण्ठेहस्तेपरांशुभाम्॥भक्तानाँव्वरदंसिद्धिबुद्धिभ्यांसेवितंसदा॥सिद्धिबुद्धिप्रदंनृणान्धर्म्मार्त्थकाममोक्षदम् ॥ ब्रह्मरुद्रेन्द्रवैस्संस्तुतम्परमर्षिभिः॥इतिध्यानम्॥अथावाहनम् ॥ आगच्छजगदाधारसुरासुरवरार्च्चित ॥ अनाथनाथसर्व्वज्ञगीर्व्वाणपरिपूजित ॥ इत्यावाहनम् ॥ अथासनम् ॥ स्वर्ण्णसिंहासनन्दिव्यन्नानारत्नसमन्वित

म् ॥ समर्प्पितम्मयादेवतत्रत्वंसमुपाविश ॥ इत्यासनम् ॥ अ थपाद्यम् ॥ देवदेवेशसर्व्वेशसर्व्वतीर्त्थाहृतञ्जलम्॥ पाद्यङ्गृहाणग णपगन्धपुष्पाक्षतैर्य्युतम् ॥ इतिपाद्यम् ॥ अथार्घ्यम् ॥ प्रवा लमुक्ताफलपूगरत्नन्ताम्बूलजाम्बूनदमष्टगन्धम् ॥ पुष्पाक्षतायु क्तममोघशक्तेदत्तम्मयार्घ्यंसफलीकुरुष्व ॥ इत्यर्घ्यम् ॥ अथा चमनीयम्॥गङ्गादिसर्व्वतीर्त्थेभ्यःप्रार्त्थितन्तोयमुत्तमम् ॥ कर्प्पू रैलालवङ्गादिवासितंस्वीकुरुप्रभो ॥ इत्याचमनीयम् ॥ चम्पका शोकवकुलमालतीमल्लिकादिभिः ॥ वासितंस्निग्धताहेतुन्तैलञ्चा रुप्रगृह्यताम् ॥ इतितैलम् ॥ अथदुग्धस्नानम् ॥ कामधेनुसमु द्भूतंसर्व्वेषाञ्जीवनम्परम् ॥ पावनंयज्ञहेतुन्तेपयःस्नानार्त्थमर्प्पित म् ॥ इतिदुग्धस्नानम् ॥ अथदधिस्नानम् ॥ धेनुदुग्धसमुद्भूतंशु द्धंसर्व्वगतंप्रियम् ॥ मयानीतन्दधिवरंस्नानार्त्थम्प्रतिगृह्यताम् ॥ इतिदधिस्नानम् ॥ अथघृतस्नानम् ॥ नवनीतसमुत्पन्नंसर्व्वस न्तोषकारणम् ॥ यथाङ्गन्देवताहारङ्घृतंस्नातुंसमर्प्पितम् ॥ इ तिघृतस्नानम् ॥ अथमधुस्नानम् ॥ रक्तसारघसम्भूतंसर्व्वतेजो विवर्द्धनम् ॥ सर्व्वपुष्टिकरन्देवमधुस्नानार्त्थमर्प्पितम् ॥ इतिमधु स्नानम् ॥ अथशर्क्करास्नानम् ॥ इक्षुसारससमुद्भूतांशर्क्करांसुम नोहराम् ॥ मलापहारिणींस्नातुङ्गृहाणत्वम्मयार्प्पिताम् ॥ इतिश र्क्करास्नानम् ॥ अथगुडस्नानम् ॥ सर्व्वमाधुर्य्यताहेतुस्स्वादु स्सर्व्वप्रियङ्करः ॥ पुष्टिकृत्स्नातुमानीतइक्षुसारभवोगुडः ॥ इति गुडस्नानम् ॥ अथमधुपर्क्कः ॥ कांस्येकांस्येन पिहितोदधिम ध्वाज्यपूरितः ॥ मधुपर्क्कोमयानीतःपूजार्त्थम्प्रतिगृह्यताम् ॥ इतिमधुपर्क्कः ॥ अथशुद्धोदकस्नानम् ॥ सर्व्वतीर्त्थाहृतन्तोयम्म यात्रार्त्थनयाविभो ॥ सुवासितङ्गृहाणेदंसम्यक्स्नातुंसुरेश्वर ॥ तिशुद्धोदकस्नानम् ॥ अथवस्त्रम् ॥ रक्तवस्त्रयुगन्देवलोकलज्जा

निवारणम् ॥ अनग्घ्यमतिसूक्ष्मञ्चगृहाणेदम्मयार्प्पितम् ॥ इ
तिवस्त्रम् ॥ अथोपवीतम् ॥ राजतम्ब्रह्मसूत्रञ्चकाञ्चनंरक्तसँय्यु
तम् ॥ भक्त्योपपादितन्देवगृहाणपरमेश्वर ॥ इतियज्ञोपवीत
म् ॥ अथभूषणम् ॥ अनेकरत्नयुक्तानिभूषणानिबहूनिच ॥
तत्तदङ्गेकाञ्चनानियोजयामितवाज्ञया ॥ इतिभूषणानि ॥ अथच
न्दनम् ॥ अष्टगन्धसमायुक्तंरक्तचन्दनमुत्तमम् ॥ द्वादशाङ्गेषुतदे
वलेपयामिकृपाङ्कुरु ॥ इतिचन्दनम् ॥ अथाक्षताः ॥ रक्तचन्दन
संमिश्रांस्तन्दुलांस्तिलकोपरि ॥ शोभायैसम्प्रदास्यामिगृहाण
परमेश्वर ॥ इत्यक्षताः ॥ अथपुष्पाणि ॥ पाटलङ्कर्णिकारञ्च
बन्धूकंरक्तपङ्कजम् ॥ मोगरम्मालतीपुष्पङ्गृहाणसुमनोहरम् ॥
इतिपुष्पाणि ॥अथधूपः ॥ दशाङ्गङ्गुग्गुलन्धूपंसर्व्वसौगन्ध्यकार
कम् ॥ सर्व्वपापक्षयकरन्त्वङ्गृहाणमयार्प्पितम् ॥ इतिधूपः ॥अथ
दीपः ॥ सर्व्वज्ञसर्व्वलोकेशतमोनाशनमुत्तमम् ॥ गृहाणमङ्गल
न्दीपन्देवदेवनमोऽस्तुते ॥ इतिदीपः ॥ अथनैवेद्यानि ॥ नानाप
क्वान्नसँय्युक्तम्पायसंशर्क्करान्वितम् ॥ नानाव्यञ्जनशोभाढ्यंशा
ल्योदनमनुत्तमम् ॥ दधिदुग्धघृतैर्य्युक्तँल्लवङ्गैलासमन्वितम् ॥
मरीचिचूर्ण्णसहितक्वथितावटकान्वितम् ॥राजिकाधान्यसँय्युक्त
म्मेथीपिष्टंसतक्रकम् ॥ हिङ्गुजीरककूष्माण्डम्मरीचिमाषपिष्टकैः
॥ सम्पादितैः सुपक्वैश्चभर्ज्जितैर्व्वटकैर्य्युतम् ॥ मोदकापूपलड्डू
कशष्कुलीमण्डकादिभिः ॥ पर्प्पटैरपिसँय्युक्तन्नैवेद्यममृतान्वि
तम् ॥ हरिद्राहिङ्गुलवणसहितंसूपमुत्तमम् ॥ ससासुद्रङ्गृहाणे
दम्भोजनङ्कुरुसादरम् ॥ इतिनैवेद्यानि ॥ अथाचमनीयम् ॥
सुतृप्तिकारकन्तोयंसुगन्धञ्चापिवेच्छया ॥त्वयितृप्तेजगत्तृप्तन्नित्य
तृप्तेमहात्मनि ॥ उत्तरापोशनार्त्थन्तेदद्मितोयंसुवासितम् ॥ मु
खपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामिते ॥ इत्याचमनीयम् ॥

अथफलानि ॥ दाडिमम्मधुरन्निम्बुजम्ब्वाम्रपनसादिकम् ॥ द्राक्षारम्भाफलम्पक्वङ्कर्क्कन्धू२खार्जुरम्फलम् ॥ नारिकेलञ्चनारिङ्गमञ्जिरञ्चम्बिरन्तथा ॥ उर्व्वारुकञ्चदेवेशफलान्येतानिगृह्यताम् ॥ इतिफलानि ॥ अथसाचमनीयङ्करोद्वर्त्तनादिकम् ॥ मुखपाणिविशुद्धचर्त्थम्पुनस्तोयन्ददामिते ॥ गृहाणचन्दनञ्चारुकराङ्गोद्वर्त्तनंशुभम् ॥ नानापरिमलद्रव्यैर्न्निर्म्मितञ्चूर्ण्णमुत्तमम् ॥ सुगन्धिनामकम्पुण्यगन्धिचारुप्रगृह्यताम् ॥ इतिकरोद्वर्त्तनम् ॥ अथ सिन्दूरम् ॥ चारुशालूरसम्भूतँव्वंशसारससुद्भवम् ॥ सीमन्तभूषणञ्चूर्ण्णल्लाक्षाराञ्जितमस्तुते ॥ इतिसिन्दूरम् ॥ अथ ताम्बूलम् ॥ संचन्द्रपूगचूर्णाढ्यङ्गाद्यखादिरसँय्युतम् ॥ एलालवङ्गसंमिश्रन्ताम्बूलङ्केसरान्वितम् ॥ इतिताम्बूलम् ॥ अथ द्रव्यम् ॥ न्यूनातिरिक्तपूजायाःसम्पूर्णफलहेतवे ॥ दक्षिणाङ्गाञ्चनीन्देवस्थापयामितवाग्रतः॥इतिदक्षिणा ॥ अथमाला ॥ सितपीतैस्तथारक्तैर्ज्जलजै२कुसुमैःशुभैः ॥ ग्रथितांसुन्दराम्मालाङ्गृहाणपरमेश्वर ॥ इतिमाला ॥ अथदूर्व्वाः ॥ हरिताश्श्वेतवर्ण्णावापञ्चत्रिपत्रसँय्युताः ॥ दूर्वाङ्कुरामयादत्ताएकविंशतिसम्मिताः॥ इतिदूर्व्वाः ॥ अथप्रदक्षिणाः ॥ एकविंशतिसङ्ख्याकाः कुर्य्यादेवप्रदक्षिणाः ॥ पदेपदेतेदेवेशनश्यन्तुपातकानिमे ॥ इति प्रदक्षिणा ॥ अथारार्त्तिकम् ॥ औदुम्बरेराजतेवाकांस्येकाञ्चन सम्भवे ॥ पात्रेप्रकल्पितान्दीपान्गृहाणचक्षुरर्प्पकान् ॥ पञ्चारार्त्तिम्पञ्चदीपैर्दीपिताम्परमेश्वर ॥ चारुचन्द्रनिभन्दीपङ्गृहाण वीचिवारणम् ॥ यथास्यनेक्ष्यतेभस्म तथापापँव्विनाशय ॥ इत्यारार्त्तिकम् ॥

इतिपूजाविधिः

अथगणेशस्तवराजः।

ॐतत्पुरुषायविद्महेवक्रतुण्डायधीमहि ॥ तन्नोदन्तिःप्रचोदयात् ॥ ॐकारमाद्यम्प्रवदन्तिसन्तो वाचः श्रुतीनामपियङ्कुर्ण न्ति ॥ गजाननन्देवगणानताङ्घ्रिम्भजेहमर्द्धेन्दुकृतावतंसम् ॥ पादारविन्दार्च्चनतत्पराणांसंसारदावानलभङ्गदक्षम् ॥ निरन्तर न्निर्ग्गतदानतोयैस्तन्नौमिविघ्नेश्वरमम्बुदाभम् ॥ कृताङ्गरागन्नव कुङ्कुमेन मत्तालिजालम्मदपङ्कलग्नम् ॥ निवारयन्तन्निजकर्ण्ण तालैः कोविस्मरेत्पुत्रमनङ्गशत्रोः ॥ शम्भोर्ज्जटाजूटनिवासिगङ्गा जलंसमानीयकराम्बुजेन ॥ लीलाभिराराच्छिवमर्च्चयन्तङ्गजान नम्भक्तियुताभजन्ति ॥ कुमारभुक्तौपुनरात्महेतोःपयोधरौपर्व्वत राजपुत्र्याः ॥ प्रक्षालयन्तङ्करशीकरेणमौग्ध्येनतन्नागमुखम्भ जामि॥तयासमुद्धृत्यगजस्यहस्तंयेशीकराःपुष्कररन्ध्रमुक्ताः॥ व्योमाङ्गणेतेविचरन्तितारःकालात्मनामौक्तिकतुल्यभासः ॥ क्रीडारतेवारिनिधौगजस्थेवेलामतिक्रामतिवारिपूरे ॥ कल्पावसा नम्परिचिन्त्यदेवाःकैलासनाथंश्रुतिभिःस्तुवन्ति ॥ नागाननेना गकृतोत्तरीयेक्रीडारतेदेवकुमारसङ्घैः ॥ त्वायिक्षणङ्कालगतिं व्विहाय तौप्रापतुःकन्दुकतामिनेन्दू ॥ मदोल्लसत्पञ्चमुखैरजस्र मध्यापयन्तंसकलागमार्त्थम् ॥ देवानृपीन्भक्तजनैकमित्रंहेर म्बमर्कारुणमाश्रयामि ॥ पादाम्बुजाभ्यामतिवामनाभ्याङ्कृतार्थ यन्तङ्कृपयाधरित्रीम् ॥ अकारणङ्कारणमात्तवाचान्तन्नागवक्त्रज हातिचेतः ॥ येनार्प्पितंसत्यवतीसुतायपुराणमालिख्यविषाणको टचा ॥ तच्चन्द्रमौलेस्तनयन्तपोभिराराध्यमानन्दघनम्भजामि॥ पदंश्रुतीनामपदंस्तुतीनाँल्लीलावतारम्परमात्ममूर्त्तेः ॥ नागात्म कञ्चापुरुषात्मकञ्चात्वभेदमाद्यम्भजविघ्नराजम् ॥ पाशाङ्कुशौ भग्नरदन्त्वभीष्टङ्करैर्दधानङ्कररन्ध्रमुक्तैः ॥ मुक्ताफलाभैःपृथुशी

करौघैःसिञ्चन्तमङ्गंशिवयोर्भजामि ॥ अनेकमेकङ्गजमेकदन्त
ञ्चैतन्यरूपञ्जगदादिबीजम् ॥ ब्रह्मेतियँव्वेदविदोवदन्तितंशंभुसूनुं
सततम्भजामि ॥ स्वाङ्कस्थितायानिजवल्लभायामुखाम्बुजालोक
नलोलनेत्रम् ॥ स्मेराननाब्जम्मदवैभवेनरुद्धम्भजेविश्वविमोहन
न्तम् ॥ येपूर्व्वमाराध्यगजाननन्त्वांसर्व्वाणिशास्त्राणिपठन्तिते
षाम् ॥ त्वत्तोनचान्यत्प्रतिपाद्यमेतैस्तदस्तिचेत्सर्व्वमसत्यक
ल्पम् ॥ हिरण्यवर्ण्णञ्जगदीशितारङ्गविम्पुराणंरविमण्डलस्थम् ॥
गजाननँय्यम्प्रविशन्तिसन्तस्तत्कालयोगैस्तमहम्प्रपद्ये ॥वेदान्त
गीतम्पुरुषम्भजेहमात्मानमानन्दघनंहृदिस्थम् ॥गजाननँय्यन्म
हसाजनानाँव्विघ्नान्धकारोविलयम्प्रयाति॥शम्भोस्समालोक्यज
टाकलापेशशाङ्कखण्डन्निजपुष्करेण ॥ सुभग्नदन्तम्प्रविचिन्त्य
मौग्ध्यादाक्रष्टुकामःश्रियमातनोतु ॥ विघ्नाग्गलानाँव्विनिपातना
र्त्थँय्यन्नारिकेलैःकदलीफलाद्यैः ॥ प्रसारयन्तम्मदवारणास्यम्प्र
भुंसदाभीष्टमहम्भजेयम् ॥ यज्ञैरनेकैर्ब्बहुभिस्तपोभिराराध्यमाद्य
ङ्गजराजवक्त्रम् ॥ स्तुत्यानयायेविधिवत्स्तुवन्तितेसर्व्वलक्ष्मीनि
लयाभवन्ति ॥ इतिगणेशस्तवराजःसमाप्तः ॥

अथकवचम् ।

ईश्वरउवाच ॥ शृणुवक्ष्यामिकवचंसर्व्वसिद्धिकरम्प्रिये ॥ प
ठित्वापाठयित्वाचमुच्यतेसर्व्वसङ्कटात् ॥ अज्ञात्वाकवचन्देविग
णेशस्यमनुञ्जपेत् ॥ सिद्धिर्न्नजायतेतस्यकल्पकोटिशतैरपि ॥
ॐआमोदश्शिरःपातुप्रमोदश्शिखोपरि ॥ सम्मोदोभ्रूयुगेपा
तुभ्रूमध्येचगणाधिपः॥गणक्रीडश्चक्षुर्य्युगन्नासायाङ्गणनायकः ॥
गणक्रीडाचितःपातुवदनेसर्व्वसिद्धये ॥ जिह्वायांसुमुखःपातु
ग्रीवायान्दुर्म्मुखःसदा ॥ विघ्नेशोहृदयेपातु विघ्ननाशश्चवक्षसि ॥

गणानान्नायकꣳपातुबाहुयुग्मेसदामम ॥ विघ्नकर्त्ताच उदरेवि घ्नहर्त्ताचलिङ्गके ॥ गजवक्त्रꣳकटीदेशेएकदन्तोनितम्बके॥लम्बो दरःसदापातुगुह्यदेशेममारुणः ॥ व्यालयज्ञोपवीतीमाम्पातुपाद युगेसदा॥जापकःसर्व्वदापातुजानुजङ्घेगणाधिपः॥हारिद्रःसर्व्वदा पातुसर्व्वाङ्गेगणनायकः ॥ यइदम्प्रपठेन्नित्यङ्गणेशस्यमहेश्वरि ॥ कवचंसर्व्वसिद्धाख्यंसर्व्वविघ्नविनाशनम् ॥ सर्व्वसिद्धिकरंसाक्षा त्सर्व्वपापविमोचनम्॥सर्व्वसम्पत्प्रदंसाक्षात्सर्व्वशत्रुक्षयङ्करम् ॥ ग्रहपीडाज्वरारोगायेचान्येगुह्यकादयः॥ पठनाद्धारणादेवनाशमा यान्तितत्क्षणात् ॥ धनधान्यकरन्देविकवचंसुरपूजितम् ॥ समो नास्तिमहेशानित्रैलोक्येकवचस्यच ॥ हारिद्रस्यमहेशानिकव चस्यचभूतले ॥ किमन्यैरसदालापैर्य्यत्रायुर्व्व्ययतामियात् ॥ इति विश्वसारतन्त्रेगणेशकवचंसमाप्तम् ॥

अथोपनिषत्।

ॐ लंस्वाहानाववतुस्वाहा नौभुनक्तुस्वाहा वीर्यंकरवावहै ॥ तेजस्विनावधीतमस्तुमाविद्विषावहै ॥ ॐ शान्तिःशा न्तिःशान्तिः ॥ ॐलं नमस्तेगणपतये ॥ त्वमेवप्रत्यक्षंतत्त्वमासि ॥ त्वमेवकेवलंकर्त्तासि ॥ त्वमेवकेवलन्धर्त्तासि ॥ त्वमेवकेवलंह र्त्तासि ॥ त्वमेवसर्व्वंखल्विदम्ब्रह्मासि ॥ त्वंसाक्षादात्मासिनित्यं ॥ ऋतंवच्मि ॥ सत्यंवच्मि ॥ अवत्वंमाम् ॥ अववक्तारम् ॥ अ वश्रोतारम् ॥ अवदातारम् ॥ अवधातारम्॥अवानूचानमवशिष्य म् ॥ अवपश्चात्तात् ॥ अवपुरस्तात् ॥ अवोत्तरात्तात् ॥ अवद क्षिणात्तात् ॥ अवचोर्द्धात्तात् ॥ अवाधरात्तात् ॥ सर्व्वतोमाम्पा हिपाहिसमन्तात् ॥ त्वंवाङ्मयस्त्वञ्चिन्मयः ॥ त्वमानन्दमय स्त्वं ब्रह्ममयस्त्वं सच्चिदानन्दाद्वितीयोसि ॥ त्वम्प्रत्यक्षम्ब्र

ह्मासि ॥ त्वंज्ञानमयो विज्ञानमयोऽसि ॥ सर्वंजगदिदन्त्वत्तोजा
यते ॥ सर्वंजगदिदं त्वत्तस्तिष्ठति ॥ सर्वंजगदिदन्त्वयिलयमेष्य
ति ॥ त्वम्भूमिरापोनलोऽनिलोनभः ॥ त्वंचत्वारिवाक्पदानि ॥
त्वङ्गुणत्रयातीतः ॥ त्वन्देहत्रयातीतः ॥ त्वङ्कालत्रयाती
तः ॥ त्वंमूलाधारस्थितोऽसिनित्यम् ॥ त्वंशक्तित्रयात्मकः ॥त्वां
योगिनोध्यायन्तिनित्यम् ॥ त्वंब्रह्मा त्वंविष्णुस्त्वंरुद्रस्त्वमिन्द्र
स्त्वमग्निस्त्वं वायुस्त्वं सूर्य्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम्
॥ गणादीन्पूर्वमुच्चार्य्यवर्णादींस्तदनन्तरम् ॥ अनुस्वारःपरत
रः ॥ अर्द्धेन्दुलसितन्तारेणरुद्धम् ॥ एतत्तवमनुस्वरूपम् ॥
गकारःपूर्वरूपम् ॥ अकारोमध्यमरूपम् ॥ अनुस्वारश्चान्त्यरूप
म् ॥ विन्दुरुत्तररूपम् ॥ नादःसन्धानम् ॥ संहितासन्धिः ॥
सैषागणेशविद्या ॥ गणऋषिर्निचृद्गायत्रीच्छन्दः ॥ गणपति
र्देवता ॥ ॐ गंगणपतयेनमः ॥ एकदन्तायविद्महेवक्रतुण्डा
यधीमहि ॥ तन्नोदन्तिःप्रचोदयात् ॥ एकदन्तञ्चतुर्ह
स्तम्पाशमङ्कुशधारिणम् ॥ रदंचवरदंहस्तैर्ब्बिभ्राणम्मू
षकध्वजम् ॥ रक्तंलम्बोदरंशूर्प्पकर्णंकंरक्तवाससम ॥ रक्त
गन्धानुलिप्ताङ्गंरक्तपुष्पैस्सुपूजितम् ॥ भक्तानुकम्पिनन्दे
वञ्जगत्कारणमच्युतम् ॥ आविर्भूतञ्चसृष्ट्यादौप्रकृतेःपुरुषा
त्परम् ॥ एवन्ध्यायतियोनित्यंसयोगीयोगिनाँव्वरः ॥ ॐन
मोव्रातपतयेनमोगणपतयेनमःप्रमथपतये नमस्तेअस्तुलम्बोद
रायैकदन्तायविघ्ननाशिनेशिवसुतायवरदमूर्त्तयेनमः ॥ एतदथ
र्वशीर्षंयोऽधीते ॥ सब्रह्मभूयायकल्पते ॥ ससर्वविघ्नैर्नबाध्य
ते ॥ ससर्वतःसुखमेधते ॥ सपञ्चमहापापात्प्रमुच्यते ॥ सा
यमधीयानोदिवसकृतंपापन्नाशयति ॥ प्रातरधीयानोरात्रिकृतं
पापन्नाशयति ॥ सायम्प्रातःप्रयुञ्जानोअपापोभवति ॥ सर्व

त्राधीयानोऽपविघ्नोभवति ॥ धर्ममर्थंकाममंमोक्षञ्चविन्दति ॥ इदमथर्वशीर्षमशिष्यायनदेयम् ॥ योयदिमोहाद्दास्यति ॥सपापीयान्भवति ॥ सहस्रावर्त्तनाद्यंयंकाममधीते ॥ तन्तमनेनसाधयेत् ॥ अनेनगणपतिमभिंषिञ्चति ॥ सवाग्ग्मीभवति ॥चतुर्थ्यांमनश्न ञ्जपतिसविद्यावान्भवति ॥ इत्यथर्वणवाक्यम् ॥ ब्रह्माद्याचरणं विद्यान्नबिभेतिकदाचनेति ॥ योदूर्वांकुरैर्य्यजति ॥ सवैश्रवणोप्पो भवति ॥ योलाजैर्य्यजति ॥ सयशोवान्भवति समेधावान्भवति ॥ योमोदकसहस्रेणयजति ॥ सवाञ्छितफलमवाप्नोति ॥ यः साज्यसमिद्भिर्य्यजति॥ससर्वंलभतेससर्वंलभते ॥ अष्टौब्राह्मणान् सम्यग्ग्राहयित्वासूर्य्यवर्चस्वीभवति ॥ सूर्य्यग्रहेमहानद्यांप्रतिमा सन्निधौवाजप्त्वासिद्धमन्त्रोभवति ॥ महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥ महाप्रत्यवायात्प्रमुच्यते ॥ ससर्वविद्भवति ससर्वविद्भवति ॥ यएवंवेद ॥ इत्युपनिषत् ॥ सहनाववतु ॥ सह नौभुनक्तु ॥ सहवीर्यंकरवावहै ॥ तेजस्विनावधीतमस्तुमाविद्विषावहै ॥ ॐशान्तिःशान्तिःशान्तिः ॥ इतिगणपत्युपनिषत् ॥

अथशतनाम।

ॐ गणेश्वरोगणक्रीडोमहागणपतिस्तथा ॥ विश्वकर्त्ता विश्वमुखोदुर्ज्जयोधूर्ज्जयोजयः ॥ १ ॥ सुरूपःसर्व्वनेत्राधिवासोवीरासनाश्रयः ॥ योगाधिपस्तारकस्थः पुरुषोगजकर्ण्णकः ॥ २ ॥ चित्राङ्गःश्यामदशनोभालचन्द्रश्चतुर्भुजः ॥ शम्भुतेजायज्ञकायःसर्व्वात्मासामबृंहितः ॥ ३ ॥ कुलाचलांसोव्योमनाभिःकल्पद्रुमवनालयः ॥ निम्ननाभिःस्थूलकुक्षिः पीनवक्षाबृहद्भुजः ॥ ४ ॥ पीनस्कन्धश्चकम्बुकण्ठोलम्बोष्ठोलम्बनासिकः ॥ सर्व्वावयवसम्पूर्णःसर्व्वलक्षणलक्षितः ॥ ५ ॥ इक्षुचापधरः शू

लीकान्तिकन्दलिताश्रयः ॥ अक्षमालाधरोज्ञानमुद्रावान्विजयावहः ॥ ६ ॥ कामिनीकामनःकाममालिनीकेलिलालितः ॥ अमोघसिद्धिराधार आधाराधेयवर्ज्जितः ॥ ७ ॥ इन्दीवरदलश्याम इन्दुमण्डलनिर्म्मलः ॥ कर्म्मसाक्षीकर्म्मकर्त्ताकर्म्माकर्म्मफलप्रदः ॥ ८ ॥ कमण्डलुधरःकल्पःकपर्दीकटिसूत्रभृत् ॥ कारुण्यदेहःकपिलोगुह्यागमनिरूपितः ॥ ९ ॥ गुहाशयोगुहाब्धिस्थोघटकुम्भोघटोदरः॥पूर्णानन्दःपरानन्दोधनदोधरणीधरः॥ ॥ १० ॥ बृहत्तमोब्रह्मपरोब्रह्मण्योब्रह्मवित्प्रियः ॥ भव्योभूतालयोभोगदातावैभवमहामनाः ॥ ११ ॥ वरेण्योवामदेवश्चवन्द्यो वज्रनिवारणः ॥ विश्वकर्त्ताविश्वचक्षुर्हवनंहव्यकव्यभुक् ॥ १२॥ स्वतन्त्रस्सत्यसङ्कल्पस्तथासौभाग्यवर्द्धनः ॥ कीर्त्तिदःशोकहारी चत्रिवर्गफलदायकः ॥ १३ ॥ चतुर्बाहुश्चतुर्दन्तश्चतुर्थीतिथिसम्भवः ॥ सहस्रशीर्ष्षापुरुषः सहस्राक्षस्सहस्रपात् ॥ १४ ॥ कामरूपःकामगतिर्द्विरदोद्वीपरक्षकः ॥ क्षेत्राधिपःक्षमाभर्त्तालयस्थोलड्डुकप्रियः ॥ १५ ॥ प्रतिवादिमुखस्तम्भोदुष्टचित्तप्रसादनः ॥ भगवान्भक्तिसुलभोयाज्ञिकोयाजकप्रियः ॥ १६ ॥ इत्येवन्देवदेवस्यगणराजस्यधीमतः ॥ शतमष्टोत्तरन्नाम्नांसारभूतम्प्रकीर्त्तितम् ॥ १७ ॥ सहस्रनाम्नामाकृष्यमयाप्रोक्तम्मनोहरम् ॥ ब्राह्मेमुहूर्त्तेचोत्थायस्मृत्वादेवङ्गणेश्वरम् ॥ पठेत्स्तोत्रमिदम्भक्त्यागणराजःप्रसीदति ॥ १८ ॥ इतिश्रीगणेशस्याष्टोत्तरशतनामस्तोत्रंसमाप्तम् ॥

अथसहस्रनाम ।

व्यासउवाच ॥ कथन्नाम्नासहस्रंस्वङ्गणेशउपदिष्टवान् ॥ शिवायतन्ममाचक्ष्वलोकानुग्रहतत्पर ॥ १ ॥ ब्रह्मोवाच ॥ देव

देवम्पुरारातिःपुरत्रयजयोद्यमे ॥ अनर्च्चनाद्गणेशस्यजातोविघ्नाकुलꣳकिल ॥ २ ॥ मनसासविनिर्द्धार्य्यततस्तद्विघ्नकारणम् ॥ महागणपतिम्भक्त्यासमभ्यर्च्चयथाविधि ॥ ३ ॥ विघ्नप्रशमनोपायमपृच्छदपराजितः ॥ सन्तुष्टपूजयाशम्भोर्म्महागणपतिः स्वयम् ॥ ४ ॥ सर्व्वविघ्नैकहरणंसर्व्वकामफलप्रदम् ॥ ततस्तस्मैस्वकन्नाम्नांसहस्रमिदमब्रवीत ॥ ५ ॥ अस्यश्रीमहागणपतिसहस्रनाममालामन्त्रस्यगणेशऋषिः महागणपतिर्द्देवता नानाविधानिच्छन्दांसि गमितिबीजन्तुण्डमितिशक्तिः स्वाहेतिकीलकम् सकलविघ्ननाशनद्वारामहागणपतिप्रीत्यर्थेजपेविनियोगः ॥ महागणपतिरुवाच ॥ ॐ गणेश्वरोगणक्रीडोगणनाथोगणाधिपः ॥ एकदंष्ट्रोवक्रतुण्डोगजवक्त्रोमहोदरः ॥ ६ ॥ लम्बोधरोधूम्रवर्ण्णोंविकटोविघ्ननायकः ॥ सुमुखोदुर्म्मुखोबुद्धोविघ्नराजोगजाननः ॥ ७ ॥ भीमꣳप्रमोदआमोदःसुरानन्दोमदोत्कटः ॥ हेरम्बःशम्बरः शम्भुर्ल्लम्बकर्ण्णोंमहाबलः ॥ ८ ॥ नन्दनोलम्पटोभीरुर्म्मेघनादोगणञ्जयः ॥ विनायकोविरूपाक्षोधीरःशूरोवरप्रदः ॥९॥ महागणपतिर्ब्बुद्धिप्रियꣳक्षिप्रप्रसादनः ॥ रुद्रप्रियोगणाध्यक्षउमापुत्रोऽघनाशनः ॥ १० ॥ कुमारगुरुरीशानपुत्रोमूषकवाहनः ॥ सिद्धिप्रियःसिद्धिपतिःसिद्धःसिद्धिविनायकः ॥ ११ ॥ अविघ्नस्तुम्बरुःसिंहवाहनोमोहिनीप्रियः ॥ कटङ्कटोराजपुत्रः शालकः सम्मितोऽमितः ॥ १२ ॥ कूष्माण्डसामसम्भूतिर्द्दुर्ज्जयोधूर्ज्जयोजयः ॥ भूपतिर्ब्भुवनपतिर्ब्भूतानाम्पतिरव्ययः ॥ १३ ॥ विश्वकर्त्ताविश्वमुखोविश्वरूपोनिधिर्ग्घृणिः ॥ कविःकवीनामृषभोब्रह्मण्योब्रह्मणस्पतिः ॥ १४ ॥ज्येष्ठराजोनिधिपतिर्न्निधिप्रियपतिप्रियः ॥ हिरण्मयपुरान्तस्थस्सूर्य्यमण्डलमध्यगः ॥ १५ ॥ कराहतिध्वस्तसिन्धुसलिलःपूष

दन्ताभित् ॥ उमाङ्केलिकुतुकीमुक्तिद×कुलपालनः ॥ १६ ॥ किरीटीकुण्डलीहारीवनमालीमनोमयः ॥ वैमुख्यहतदैत्यश्रीःपादाहतजितक्षितिः ॥ १७ ॥ सद्योजातःस्वर्ण्णमुञ्जमेखलीदुर्न्निमित्तहृत् ॥ दुस्स्वप्नहृत्प्रसहनोगुणिनादप्रतिष्ठितः ॥ १८ ॥ सुरूपःसर्व्वनेत्राधिवासोवीरासनाश्रयः ॥ पीताम्बर×खण्डरदःखण्डेन्दुकृतशेखरः ॥ १९ ॥ चित्राङ्गःश्यामदशनोभालचन्द्रश्चतुर्भुजः ॥ योगाधिपस्तारकस्थःपुरुषोगजकर्ण्णकः ॥ ॥ २० ॥ गणाधिराजोविजयःस्थिरोगजपतिर्द्ध्वजी ॥ देवदेवःस्मरप्राणोदीपकोवायुकीलकः ॥ २१ ॥ विपश्चिद्वरदोनादोनादभिन्नबलाहकः ॥ वराहरदनोमृत्युञ्जयोव्याघ्राजिनाम्बरः ॥ ॥ २२ ॥ इच्छाशक्तिधरोदेवत्रातादैत्यविमर्द्दनः ॥ शम्भुवक्त्रोद्भवःशम्भुकोपहाशम्भुहास्यभूः ॥ २३ ॥ शम्भुतेजाः शिवाशोकहारीगौरीसुखावहः ॥ उमाङ्गमलजोगौरीतेजोभूःस्वर्द्धुनीभवः ॥ २४ ॥ यज्ञकायोमहानादोगिरिवर्ष्माशुभाननः ॥ सर्व्वात्मासर्व्वदेवात्माब्रह्ममूर्द्धाककुप्श्रुतिः ॥ २५ ॥ ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ॥ जगज्जन्मलयोन्मेषनिमिषोन्यर्कसोमदृक् ॥ २६ ॥ गिरीन्द्रैकरदोधर्म्मोधर्म्मिष्ठःसामबृंहितः ॥ग्रहदृक्ष्मदशनोवाणीजिह्वोवासवनासिकः ॥ २७ ॥ भ्रूमध्यसंस्थितकरोब्रह्मविद्यामदोत्कटः ॥ कुलाचलांसः सोमार्कघण्टोरुद्रशिरोधरः ॥ ॥ २८ ॥ नदीनदभुजःसर्प्पाङ्गुलीकस्तारकानखः ॥ व्योमनाभिःश्रीहृदयोमेरुपृष्ठोऽर्ण्णवोदरः॥ २९॥ कुक्षिस्थयक्षगन्धर्व्वरक्षःकिन्नरमानुषः ॥ पृथ्वीकटिःसृष्टिलिङ्गःशैलोरुर्दस्रजानुकः ॥ ॥ ३० ॥ पातालजङ्घोमुनिपात्कालाङ्गुष्ठस्त्रयीतनुः ॥ ज्योतिर्म्मण्डललाङ्गूलोहृदयालातनिश्चलः॥ ३१॥ हृत्पद्मकर्ण्णिकाशालीवियत्केलिसरोवरः ॥ सद्भक्तध्याननिगडःपूजावारिनिवारि

तः ॥ ३२ ॥ प्रतापीकश्यपसुतोगणपोविघ्नपीवली ॥ यशस्वी धार्म्मिकः स्वोजाःप्रथमःप्रमथेश्वरः ॥ ३३ ॥ चिन्तामणिर्द्वीप पतिः कल्पद्रुमवनालयः ॥ रत्नमण्डपमध्यस्थोरत्नसिंहासनाश्र यः॥३४॥तीव्राशिरोधृतपदोज्वालिनीमौलिलालितः ॥ नन्दान न्दितपीठश्रीभोगदाभूषितासनः ॥ ३५ ॥ सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ॥ तेजोवतीशिरोरत्नंसत्यानित्यावतंसितः ॥ ३६ ॥ सविघ्ननाशिनीपीठः सर्व्वशक्त्यम्बुजाश्रयः ॥ लिपिप द्मासनाधारोवह्निधामत्रयाश्रयः ॥ ३७ ॥ उन्नतप्रपदागूढगुल्फ सँव्वृतपार्ष्णिकः ॥ पीनजङ्घःश्लिष्टजानुः स्थूलोरुः प्रोन्नमत्क टिः ॥ ३८ ॥ निम्ननाभिःस्थूलकुक्षिःपीनवक्षाबृहद्भुजः ॥ पी नस्कन्धः कम्बुकण्ठोलम्बोष्ठोलम्बनासिकः ॥३९॥ भग्नवामरद स्तुङ्गसव्यदन्तोमहाहनुः ॥ ह्रस्वनेत्रत्रयःशूर्पकर्णोनिबिडमस्त कः ॥ ४० ॥ स्तवकाकारकुम्भाग्रोरत्नमौलिर्न्निरंकुशः ॥ सर्प्प हारकटीसूत्रःसर्प्पयज्ञोपवीतवान् ॥ ४१ ॥ सर्प्पकोटीरकटकः सर्प्पग्रैवेयकाङ्गदः ॥ सर्प्पकक्ष्योदराबन्धःसर्प्पराजोत्तरीयकः ॥ ॥ ४२ ॥ रक्तोरक्ताम्बरधरोरक्तमाल्यविभूषणः ॥ रक्तेक्षणो रक्तकरोरक्ततालोष्टपल्लवः ॥ ४३ ॥ श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः ॥ श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ॥ ॥४४॥ सर्व्वावयवसम्पूर्णः सर्व्वलक्षणलक्षितः ॥ सर्व्वाभरणशो भाढ्यः सर्व्वशोभासमन्वितः ॥४५॥ सर्व्वमङ्गलमाङ्गल्यस्सर्व कारणकारणम् ॥ सर्व्वदैककरःशार्ङ्गीबीजपूरीगदाधरः ॥ ४६ ॥ इक्षुचापधरश्शूलीचक्रपाणिस्सरोजभृत् ॥ पाशीधृतोत्पलश्शा लीमञ्जरीभृत्स्वदन्तभृत् ॥ ४७ ॥ कल्पवल्लिधरोविश्वाभयदैकक रोवशी ॥ अक्षमालाधरोज्ञानमुद्रवान्मुद्गरायुधः ॥ ४८ ॥ पूर्ण पात्रीकम्बुधरोविधृतालिसमूहकः ॥ मातुलिङ्गधरश्शूतकलिका

भृत्कुठारवान् ॥ ४९ ॥ पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः भारतीसुन्दरीनाथोविनायकरतिप्रियः ॥ ५० ॥ महालक्ष्मीप्रिय तमास्सिद्धलक्ष्मीमनोरमः ॥ रमारमेशपूर्वाङ्गोदक्षिणोमामहेश्वरः ॥ ५१ ॥ महीवराहवामाङ्गोरतिकन्दर्प्पपश्चिमः ॥ आमोदमोद जननःसप्रमोदप्रमोदनः॥५२॥सामेधितासमृद्धिश्रीर्ऋद्धिसिद्धिप्र वर्त्तकः॥दत्तसौमुख्यसुमुखःकान्तिकन्दलिताश्रयः॥ ५३ ॥ मद नावत्याश्रिताङ्घ्रिःकृतदौर्म्मुख्यदुर्म्मुखः ॥विघ्नसम्पल्लवोपघ्नस्से वोन्निद्रमदद्रवः ॥५४॥ विघ्नकृन्निघ्नचरणोद्राविणीशक्तिसत्कृतः॥ तीव्राप्रसन्ननयनोज्वालिनीपालितैकदृक् ॥ ५५ ॥ मोहिनी मोहनोभोगदायिनीकान्तिमण्डितः॥ कामिनीकान्तवक्त्रश्रीरधि ष्ठितवसुन्धरः॥ ५६ ॥ वसुन्धरामदोन्नद्धमहाशङ्खनिधिःप्रभुः ॥ नमद्वसुमतीमौलीमहापद्मनिधिप्रभुः ॥ ५७ ॥ सर्व्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥ ईशानमूर्द्धादेवेन्द्रशिखऽपवननन्दनः ॥ ५८ ॥ अग्रप्रत्यग्रनयनोदिव्यास्त्राणाम्प्रयोगवित् ॥ ऐरावता दिसर्व्वाशावारणावरणप्रियः ॥ ५९ ॥ वज्राद्यस्त्रपरीवारोगण चण्डसमाश्रयः॥ जयाजयपरीवारोविजयाविजयावहः ॥ ६० ॥ अजिताजितपादाब्जोनित्यानित्यावतंसितः ॥ विलासिनीकृतो ल्लासःशौण्डिसौन्दर्य्यमण्डितः॥६१॥अनन्तानन्तसुखदःसुमङ्ग लसुमङ्गलः॥इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥ ६२॥ सुभगासंश्रितपदोलालितालालिताश्रयः ॥ कामिनीकामनः काममालिनीकेलिलालितः ॥ ६३ ॥ सरस्वत्याश्रयोगौरीनन्द नः श्रीनिकेतनः ॥ गुरुगुप्तपदोवाचासेद्धोवागीश्वरीपतिः ॥६४॥ नलिनीकामुकोवामारामोज्येष्ठामनोरमः ॥ रौद्रीमुद्रितपादा ब्जोह्रूम्बीजस्तुङ्गशक्तिकः ॥ ६५ ॥ विश्वादिजननत्राणः स्वा हाशक्तिः सकीलकः॥अमृताब्धिकृतावासोमदघूर्णितलोचनः॥

॥ ६६ ॥ उच्छिष्टगणउच्छिष्टगणेशोगणनायकः ॥ सार्व्वकालिकसांसिद्धिर्न्नित्यशैवोदिगम्बरः ॥६७॥ अनपायोनन्तदृष्टिरप्रमेयोजरामरः॥ अनाविलोप्रतिरथोह्यच्युतोऽमृतमक्षरम् ॥ ६८॥ अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः ॥ अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥ ६९ ॥ अनाकारोऽधिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः ॥ आधारपीठआधारआधाराधेयवर्ज्जितः ॥ ॥ ७० ॥ आखुकेतनआशापूरकआखुमहारथः ॥ इक्षुसागरमध्यस्थइक्षुभक्षणलालसः ॥ ७१ ॥ इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ॥ ७२ ॥ इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥ इन्दीवरदलश्यामइन्दुमण्डलनिर्म्मलः ॥७३॥ इध्मप्रियइडाभागइडाधामेन्दिराप्रियः ॥ इक्ष्वाकुविघ्नविध्वंसीइतिकर्त्तव्यतेप्सितः ॥ ७४ ॥ ईशानमौलिरीशानईशानसुतईतिहा ॥ ईषणात्रयकल्पान्तईहामात्रविवर्ज्जितः ॥ ७५ ॥ उपेन्द्रउडुभृन्मौलिरुण्डेरकवलिप्रियः ॥ उन्नताननउत्तुङ्गउदारत्रिदशाग्रणीः ॥ ७६ ॥ ऊर्ज्जस्वानूष्मलमदऊहापोहदुरासदः ॥ ऋग्यजुःसामसंभूतिर्ऋद्धिसिद्धिप्रवर्त्तकः ॥ ७७ ॥ ऋजुचित्तैकसुलभऋणत्रयविमोचकः ॥ लुप्तविघ्नःस्वभक्तानांलुप्तशक्तिः सुरद्विषाम् ॥ ७८ ॥ लुप्तश्रीर्व्विमुखार्च्चानाँल्लूताविस्फोटनाशनः ॥एकारपीठमध्यस्थएकपादकृतासनः ॥ ७९ ॥ एशिताखिलदैत्यश्रीरेजिताखिलसंश्रयः ॥ ऐश्वर्य्यनिधिरैश्वर्य्यमैहिकामुष्मिकप्रदः ॥ ८० ॥ ऐरम्मदसमोन्मेषऐरावतनिभाननः॥ ओङ्कारवाच्यओङ्कारओजस्वानोषधीपतिः ॥ ८१ ॥ औदार्य्यनिधिरौद्धत्यधुर्य्यऔन्नत्यनिःस्वनः ॥ अङ्कुशस्सुरनागानामङ्कुशःसुरविद्विषाम्॥ ८२ ॥ असमस्तविसर्ग्गाणाम्पदेषुपरिकीर्त्तितः ॥ कमण्डलुधरःकल्पःकपर्द्दीकलभाननः ॥ ८३ ॥ कर्म्मसाक्षीकर्म्मकर्त्ताकर्म्माक

र्म्मफलप्रदः ॥ कदम्बगोलकाकारः कूष्माण्डगणनायकः ॥ ॥ ८४ ॥ कारुण्यदेयऽकपिलःकथकऽकटिसूत्रभृत् ॥ खर्व्वऽखड्गप्रियऽखड्गखातान्तस्थऽखनिर्म्मलः ॥ ८५ ॥ खल्वाटशृङ्गनिलयऽखट्वाङ्गीखदुरासदः॥गुणाढ्योगहनोगस्थोगद्यपद्यसुधार्ण्णवः ॥ ८६ ॥ गद्यगानप्रियोगर्ज्जोगीतगीर्व्वाणपूर्व्वजः ॥ गुह्याचाररतोगुह्योगुह्यागमनिरूपितः ॥ ८७ ॥ गुह्याशयोगुहाब्धिस्थोगुरुगम्योगुरोर्गुरुः॥ घण्टाघर्घरिकामाली घटकुम्भोघटोदरः॥ ॥ ८८ ॥ चण्डश्चण्डेश्वरसुतश्चण्डेशश्चण्डविक्रमः ॥ ८९ ॥ चराचरपतिश्चिन्तामणिश्चर्व्वणलालसः ॥ छन्दश्छन्दोवपुश्छन्दोदुर्ल्लक्ष्यश्छन्दविग्रहः ॥ ९० ॥ जगद्योनिर्ज्जगत्साक्षीजगदीशोजगन्मयः ॥ जपोजपपरोजप्योजिह्वासिंहासनप्रभुः ॥ ९१ ॥ झलज्झल्लोल्लसद्दानझङ्कारिभ्रमराकुलः ॥ टङ्कारस्फारसंरावष्टङ्कारिमणिनूपुरः ॥ ९२ ॥ ठद्वयीपल्लवान्तस्थःसर्वमन्त्रैकसिद्धिदः ॥ डिण्डिमुण्डोडाकिनीशोडामरोडिण्डिमप्रियः ॥ ९३ ॥ ढक्कानिनादमुदितोढौङ्कोढुण्ढिविनायकः ॥ ९४ ॥ तत्त्वानाम्परमन्तत्त्वन्तत्त्वम्पदनिरूपितः ॥ तारकान्तरसंस्थानस्तारकस्तारकान्तकः ॥ ९५ ॥ स्थाणुःस्थाणुप्रियःस्थातास्थावरञ्जङ्गमञ्जगत् ॥ दक्षयज्ञप्रमथनोदातादानवमोहनः ॥ ९६ ॥ दयावान्दिव्यविभवोदण्डभृद्दण्डनायकः ॥ दन्तप्रभिन्नाभ्रमालोदैत्यवारणदारणः ॥ ९७ ॥ दंष्ट्रालग्नद्विपघटोदेवार्त्थनृगजाकृतिः ॥ धनधान्यपतिर्द्धन्योधनदोधरणीधरः ॥९८॥ ध्यानैकप्रकटोध्येयोध्यानन्ध्यानपरायणः ॥ ९९ ॥ नन्द्योनन्दिप्रियोनादोनादमध्यप्रतिष्ठितः ॥निष्कलोनिर्म्मलोनित्योनित्यानित्योनिरामयः॥ १०० ॥ परँव्योमपरन्धामपरमात्मापरम्पदम् ॥ परात्परऽपशुपतिःपशुपाशविमोचकः ॥ १०१ ॥ पूर्णानन्दऽपरानन्दःपुराणपुरुषोत्त

मः ॥ पद्मप्रसन्ननयनःप्रणताज्ञानमोचनः ॥ १०२ ॥ प्रणामप्रत्य यातीतःप्रणतार्त्तिनिवारणः ॥ फलहस्तःफणिपतिःफेत्कारःफाणितप्रियः ॥ १०३ ॥ बाणार्च्चिताङ्घ्रियुगलोबालकेलिकुतूहली ॥ ब्रह्मब्रह्मार्च्चितपदोब्रह्मचारीबृहस्पतिः॥१०४॥बृहत्तमोब्रह्म परोब्रह्मण्योब्रह्मवित्प्रियः ॥ बृहन्नादाट्यचित्कारोब्रह्माण्डवलिमेखलः ॥१०५॥ भ्रूक्षेपदत्तलक्ष्मीकोभग्नोभद्रोभयापहः॥भगवान्भक्तिसुलभोभूतिदोभूतिभूषणः ॥१०६॥ भव्योभूतालयोभोगदाता भ्रूमध्यगोचरः॥मन्त्रोमन्त्रपतिर्म्मन्त्रीमदमत्तमनोरमः ॥१०७॥ मेखलावान्मन्दगतिर्मतिमत्कमलेक्षणः।महाबलोमहावीर्य्योमहाप्राणोमहामनाः॥१०८॥यज्ञोयज्ञपतिर्य्यज्ञगोत्तायज्ञफलप्रदः ॥यशस्करोयोगगम्योयाज्ञिकोयाजकप्रियः ॥१०९॥ रसोरसप्रियोरस्योरञ्जकोरावणार्च्चितः ॥ रक्षोरक्षाकरोरत्नगर्भोराज्यसुखप्रदः ॥ ११०॥ लक्ष्यालक्षप्रदोलक्ष्योलयस्थोलड्डुकप्रियः ॥ लानप्रियोलास्यपरोलाभकृल्लोकविश्रुतः ॥ १११ ॥ वरेण्योवह्निवदनोवन्द्योवेदान्तगोचरः ॥ विकर्त्तांविश्वतश्चक्षुर्व्विधातावि श्वतोमुखः ॥ ११२ ॥ वामदेवोविश्वनेतावज्रीवज्रनिवारणः ॥ विश्वबन्धनविष्कम्भाधारोविश्वेश्वरःप्रभुः ॥ ११३ ॥ शब्दब्रह्मशमप्राप्यःशम्भुशक्तिगणेश्वरः ॥ शास्ताशिखाग्रनिलयःशरण्यःशिखरीश्वरः ॥ ११४॥ षड्तुकुसुमस्रग्वीषडाधारःषडक्षरः ॥संसारवैद्यःसर्व्वज्ञस्सर्व्वभेषजभेषजम् ॥११५ ॥ सृष्टिस्थितिलयक्रीडःसुरकुञ्जरभेदनः ॥ सिन्दूरितमहाकुम्भस्सदसद्व्यक्तिदायकः ॥ ॥११६॥साक्षीसमुद्रमथनःस्वसँव्वेद्यःस्वदक्षिणः॥स्वतन्त्रःसत्यसंङ्कल्पस्सामगानरतस्सुखी ॥११७॥ हंसोहस्तिपिशाचीशोहवनंहव्यकव्यभुक् ॥ हव्यंहुताप्रियोहर्ष्णोर्हल्लेखामन्त्रमध्यगः ॥ ॥ ११८ ॥ क्षेत्राधिपःक्षमाभर्त्ताक्षमापरपरायणः ॥ क्षिप्रक्षेमक

रऽक्षेमानन्दःक्षोणीसुरद्रुमः ॥११९॥ धर्म्मप्रदोर्त्थदऽकामदाता सौभाग्यवर्द्धनः॥विद्याप्रदोविभवदोमुक्तिमुक्तिप्रदायकः॥१२०॥ आभिरूप्यकरोवीरःश्रीप्रदोविजयप्रदः॥ सर्व्ववश्यकरोगर्भ्भदोष हापुत्रपौत्रदः ॥ १२१ ॥ मेधादःकीर्त्तिदःशोकहारीदौर्भाग्यनाश नः ॥ श्रीशोकहारीदौर्भाग्यनाशनस्सर्व्वशक्तिभृत्॥१२२॥प्रति वादिमुखस्तम्भोऽदृष्टचित्तप्रसादनः ॥ पराभिचारशमनोदुऽखभ ञ्जनकारकः ॥१२३॥ लवस्त्रुटिऽकलाकाष्ठानिमेषस्तत्परऽक्षणः ॥ घटीमुहूर्त्तऽप्रहरोदिवानक्तमहर्न्निशम् ॥ १२४ ॥ पक्षोमासोय नर्व्वर्षय्युगङ्कल्पोमहालयः ॥ राशिस्तारातिथिर्य्योगोवारःकरण मंशकम् ॥१२५॥ लग्नंहोराकालचक्रम्मेरुस्सप्तर्षयोध्रुवः ॥ राहु र्म्मन्दऽकविर्ज्जीवोबुधोभौमश्शशीरविः॥१२६॥कालस्सृष्टिःस्थि तिर्व्विश्वंस्थावरञ्जङ्गमञ्चयत् ॥ भूरापोग्निर्म्मरुद्व्योमाहङ्कृतिऽप्रकृ तिऽपुमान् ॥१२७॥ ब्रह्माविष्णुश्शिवोरुद्रईशश्शक्तिस्सदाशिवः त्रिदशाऽपितरः सिद्धायक्षरक्षांसिकिन्नराः ॥१२८॥ साध्याविद्या धराभूतामनुष्याऽपशवऽखगाः ॥ समुद्रास्सरितश्शैलाभूतभव्य म्भवोद्भवः॥१२९। साङ्ख्यम्पातञ्जलँय्योगऽपुराणानिश्रुतिःस्मृ तिः ॥ वेदाङ्गानिसदाचारोमीमांसान्यायविस्तरः ॥ १३० ॥ आ युर्व्वेदोधनुर्व्वेदोगान्धर्व्वङ्काव्यनाटकम् ॥ वैखानसंभागवतंसात्व तम्पाञ्चरात्रकम् ॥१३१॥ शैवम्पाशुपतङ्कालमुखम्भैरवशासनम् ॥ शाक्तँव्वैनायकंसौरञ्जैनमार्हतसंहिता ॥ १३२ ॥ सदसद्व्यक्तम व्यक्तंसचेतनमचेतनम् ॥ बन्धोमोक्षःसुखम्भोगोऽयोगस्सत्यमणु र्म्महान् ॥ १३३ ॥ स्वस्तिहुम्फट्स्वधास्वाहाश्रौषट्वौषट्वष ण्नमः ॥ ज्ञानविज्ञानमानन्दोबोधस्सँव्विच्छमोयमः ॥ १३४ ॥ एकएकाक्षराधारएकाक्षरपरायणः ॥ एकाग्रधीरेकवीरएकानेक स्वरूपधृक् ॥ १३५ ॥ द्विरूपोद्विभुजोद्व्यक्षोद्विरदोद्वीपरक्षकः ॥

द्वैमातुरोद्विवदनोद्वन्द्वातीतोद्वयातिगः ॥ १३६ ॥ त्रिधामा त्रिकरस्त्रेतात्रिवर्ग्गफलदायकः ॥ त्रिगुणात्मात्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥ १३७ ॥ चतुर्ब्बाहुश्चतुर्दन्तश्चतुरात्माचतुर्म्मुखः ॥ चतुर्व्विधोपायमयश्चतुर्व्वर्ण्याश्रमाश्रयः ॥१३८॥ चतुर्व्विधवचोवृत्तिपरिवर्त्तप्रवर्तकः ॥ चतुर्त्थीपूजनप्रीतश्चतुर्त्थीतिथिसम्भवः॥१३९॥ पञ्चाक्षरात्मापञ्चात्मापञ्चास्य२पञ्चकृत्यकृत्॥ पञ्चाधार२पञ्चवर्ण्ण२पञ्चाक्षरपरायणः ॥१४०॥ पञ्चताल२पञ्चकरःपञ्चप्रणवभावितः ॥ पञ्चब्रह्ममयस्फूर्त्ति२पञ्चवारणवारितः ॥ १४१ ॥ पञ्चभक्ष्यप्रिय२पञ्चबाण२पञ्चशिवात्मकः ॥ षट्कोणपीठः षट्चक्रधामाषड्ग्रन्थिभेदकः ॥१४२॥ षडध्वध्वान्तविध्वंसीषडङ्गुलमहाह्रदः ॥ षण्मुखः षण्मुखभ्रातापट्शक्तिपरिवारितः ॥ १४३ ॥ षड्वैरिवर्ग्गविध्वंसीषडूर्म्मिभयभञ्जनः ॥ षट्तर्क्कदूरःषट्कर्म्मनिरतः षड्रसाश्रयः ॥ १४४ ॥ सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥ सप्तस्वर्ल्लोकमुकुटः सप्तसातिवरप्रदः ॥ ॥ १४५ ॥ सप्ताङ्गराज्यसुखदः सप्तर्ष्षिगणमण्डितः ॥ सप्तच्छन्दोनिधिस्सप्तहोतासप्तस्वराश्रयः ॥ १४६ ॥ सप्ताब्धिकेलिकासारःसप्तमातृनिषेवितः सप्तच्छन्दोमोदमदस्सप्तच्छन्दोमखप्रभुः ॥ १४७॥ अष्टमूर्त्तिद्यर्द्धेयमूर्त्तिरष्टप्रकृतिकारणम् ॥ अष्टाङ्गयोगफलभूरष्टपत्राम्बुजासनः ॥ १४८॥ अष्टशक्तिसमृद्धश्रीरष्टैश्वर्य्यप्रदायकः ॥ अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ॥१४९॥ अष्टभैरवसेव्योष्टवसुवन्द्योऽष्टमूर्त्तिभृत् ॥ अष्टचक्रस्फुरन्मूर्त्तिरष्टद्रव्यहवि२प्रियः ॥ १५० ॥ नवनागासनाध्यासीनवनिध्यनुशासिता॥ नवद्वारपुराधारोनवद्वारनिकेतनः ॥ १५१ ॥ नवनारायणस्तुत्योनवदुर्ग्गानिषेवितः ॥ नवनाथमहानाथोनवनागविभूषणः ॥ १५२ ॥ नवरत्नविचित्राङ्गोनवशक्तिशिरोधृतः ॥ दशात्म

कोदशभुजोदशदिक्पतिवन्दितः ॥ १५३ ॥ दशाध्यायोद शप्राणोदशेन्द्रियनियामकः ॥ दशाक्षरमहामन्त्रोदशाशाव्याधि विग्रहः ॥ १५४ ॥ एकादशादिभीरुद्रैःस्तुतएकादशाक्षरः ॥ द्वादशोद्दण्डदोर्दण्डोद्वादशान्तनिकेतनः ॥ १५५ ॥ त्रयो दशभिदाभिन्नविश्वेदेवाधिदैवतम् ॥ चतुर्दशेन्द्रवरदश्चतुर्दशम नुप्रभुः ॥ १५६ ॥ चतुर्दशादिविद्याढचश्चतुर्दशजगत्प्रभुः ॥ सामपञ्चदशःपञ्चदशीशीतांशुनिर्म्मलः ॥ १५७ ॥ षोडशाधार निलयः षोडशस्वरमातृकः॥ षोडशान्तपदावासः षोडशेन्दुकला त्मकः ॥ १५८ ॥ कलासप्तदशीसप्तदशः सप्तदशाक्षरः ॥ अष्टा दशद्वीपपतिरष्टादशपुराणकृत् ॥ १५९ ॥ अष्टादशौषधीसृष्टि रष्टादशविधिस्मृतः ॥ अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ॥ १६० ॥ एकविंशपुमानेकविंशत्यङ्गुलिपल्लवः ॥ चतुर्विंश तितत्वात्मापञ्चविंशाख्यपूरुषः ॥ १६१ ॥ सप्तविंशतितारेशः सप्तविंशतियोगकृत् ॥ द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ॥ ॥ १६२ ॥ षट्त्रिंशत्तत्त्वसम्भूतिरष्टत्रिंशत्कलातनुः ॥ नमदेको नपञ्चाशन्मरुद्वर्गनिरर्गलः ॥ १६३ ॥ पञ्चाशदक्षरश्रेणीः पञ्चाशद्रुद्रविग्रहः ॥ पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृका लयः ॥ १६४ ॥ द्विपञ्चाशद्वपुश्श्रेणीस्त्रिषष्टयक्षरसंश्रयः ॥ चतुष्षष्टयर्णनिर्णेताचतुःषष्टिकलानिधिः ॥ १६५ ॥चतुःषष्टि महासिद्धियोगिनीवृन्दवन्दितः ॥ अष्टषष्टिमहातीर्त्थक्षेत्रभैरवभा वनः ॥ १६६ ॥ चतुर्न्नवतिमन्त्रात्मापण्णवत्यधिकप्रभुः ॥ श तानन्दःशतधृतिश्शतपत्रायतेक्षणः ॥ १६७ ॥ शतानीकः शत मखश्शतधारवरायुधः ॥ सहस्रपत्रनिलयस्सहस्रफणभूषणः ॥ ॥ १६८ ॥ सहस्रशीर्ष्षापुरुषः सहस्राक्षस्सहस्रपात् ॥ सहस्रना मसंस्तुत्यःसहस्राक्षबलापहः ॥ १६९ ॥ दशसाहस्रफणिभृत्फ

णिराजकृतासनः ॥ अष्टाशीतिसहस्रौघमहर्षिस्तोत्रयन्त्रितः ॥ ॥ १७० ॥ लक्षाधीशप्रियाधारोलक्षाधीशमनोमयः ॥ चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥ १७१ ॥ चतुराशीतिलक्षाणाञ्जीवानान्देहसंस्थितः ॥ कोटिसूर्य्यप्रतीकाशःकोटिचन्द्रांशुनिर्म्मलः ॥ १७२ ॥ शिवाभवाध्युष्टकोटिविनायकधुरन्धरः ॥ सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः ॥ १७३ ॥ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ अनन्तदेवतासेव्योह्यनन्तमुनिसंस्तुतः ॥ १७४ ॥ अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः ॥ इतिवैनायकन्नाम्नांसहस्रमिदमीरितम् ॥ १७५ ॥ इदम्ब्राह्ममुहूर्त्तेवैयःपठेत्प्रत्यहन्नरः ॥ करस्थन्तस्यसकलमैहिकामुष्मिकंसुखम् ॥ १७६ ॥ आयुरारोग्यमैश्वर्य्यन्धर्म्मः शौर्य्यम्बलय्यँशः ॥ मेधाप्रज्ञाधृतिःकान्तिस्सौभाग्यमतिरूपता ॥ १७७ ॥ सत्यन्दयाक्षमाशान्तिर्दाक्षिण्यन्धर्म्मशीलता ॥ जगत्सय्यँमनय्यँविश्वसय्यँवादोवादपाटवम् ॥ १७८ ॥ सभापाण्डित्यमौदार्य्यङ्गाम्भीर्य्यम्ब्रह्मवर्च्चसम् ॥ औन्नत्यञ्चकुलंशीलम्प्रतापोवीर्य्यमार्य्यता ॥ १७९ ॥ ज्ञानँविज्ञानमास्तिक्यन्वैय्यँविश्वातिशायिता ॥ धनधान्याभिवृद्धिश्चसकृदस्यजपाद्भवेत् ॥ १८० ॥ वश्यञ्चतुर्व्विधन्नृणाञ्चपादस्यप्रजायते ॥ राज्ञोराजकलत्रस्यराजपुत्रस्यमन्त्रिणः ॥१८१ ॥ जप्यतेयस्यवश्यार्थैसदासस्तस्यजायते ॥ धर्म्मार्थकाममोक्षाणामनायासेनसाधनम् ॥ १८२ ॥ शाकिनीडाकिनीरक्षोयक्षोरगभयापहम् ॥ साम्राज्यसुखदञ्चैवसमस्तरिपुमर्द्दनम् ॥ १८३ ॥ समस्तकलहध्वंसिदग्धबीजप्ररोहणम् ॥ दुःस्वप्नप्रशमनङ्क्रुद्धस्वामिचित्तप्रसादनम् ॥ १८४ ॥ षट्कर्म्माष्टमहासिद्धित्रिकालज्ञानसाधनम् ॥ परकृत्योपशमनम्परचक्रविमर्द्दनम् ॥ १८५ ॥ सङ्ग्रामरङ्गेसर्व्वेषा

मिदमेकञ्जयावहम् ॥ सर्व्ववन्ध्यात्वदोषघ्नङ्कुम्भरक्षैककारणम् ॥ ॥ १८६ ॥ पठ्यतेप्रत्यहँय्यत्रस्तोत्रङ्गणपतेरिदम् ॥ देशेतत्रन दुर्भिक्षमीतयोदुरितानिच ॥ १८७ ॥ नतद्देहञ्जहातिश्रीर्य्यत्रा यञ्जप्यतेस्तवः ॥ क्षयकुष्ठप्रमेहाश्शोभगन्दरविषूचिकाः ॥ ॥ १८८ ॥ गुल्मम्प्लीहानमाध्मानमातिसारम्महोदरम् ॥ कासंश्वा समुदावर्त्तं शूलंशोकादिसम्भवम् ॥ १८९ ॥ शिरोरोगञ्चमिहि क्काङ्गण्डमालामरोचकम् ॥ वातपित्तकफद्वन्द्वत्रिदोषजानितज्व रम् ॥ १९० ॥ आगन्तुविषमंशीतमुष्णञ्चैकाहिकादिकम् ॥ इत्याद्युक्तमनुक्तञ्चारोगन्दोषादिसम्भवम् ॥ १९१ ॥ सर्व्वम्प्र शमयत्याशुस्तोत्रस्यास्यसकृज्जपात् ॥ सकृत्पाठेनसंसिद्धिःस्त्री शूद्रपतितैरपि ॥१९२॥सहस्रनाममन्त्रोयञ्जप्तव्यस्तुशुभार्तये ॥ महागणपतेस्स्तोत्रंसकामञ्प्रजपन्निदम् ॥ १८३ ॥ इच्छयासक लान्भोगानुपभुज्येहपार्त्थिवान् ॥ मनोरथफलैर्दिव्यैव्व्योमयानै र्म्मनोरमैः॥१९४॥चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मरुद्रादिसद्मसु ॥काम रूपञ्कामगतिःकामतोविचरन्निह ॥ १९५ ॥ भुक्त्वायथेप्सि तान्भोगानभीष्टैस्सहबन्धुभिः ॥गणेशानुचरोभूत्वामहागणपतेञ् प्रियः॥१९६॥ नन्दीश्वरादिसानन्दीनन्दितः सकलैर्ग्गणैः॥शिवा भ्याङ्कृपयापुत्रोनिर्व्विशेषश्चलालितः ॥ १९७ ॥ शिवभक्तञ्पू र्ण्णकामोगणेश्वरवरात्पुनः॥जातिस्मरोधर्म्मपरः सार्व्वभौमोऽभि जायते ॥१९८ ॥ निष्कामस्तुजपन्नित्यम्भक्त्याविघ्नेशतत्परः ॥ योगसिद्धिम्पराम्प्राप्यज्ञानवैराग्यसंस्थितः ॥ १९९ ॥ निरन्त रोदितानन्देपरमानन्दसँव्विदि ॥ विश्वोत्तीर्ण्णेपरेपारेपुनरावृत्तिव र्ज्जिते ॥ २०० ॥ लीनोवैनायकेधाम्निरमतेनित्यनिर्व्वृतः ॥ यो नामभिर्हुनेदेतैरर्च्चयेत्पूजयेन्नरः ॥२०१॥ राजानोवश्यताय्यान्ति रिपवोयान्तिदासताम् ॥ मन्त्राःसिध्यन्तिसर्व्वेपिसुलभास्त

सिद्धयः ॥ २०२ ॥ मूलमन्त्रादपिस्तोत्रमिदम्प्रियतरम्मम ॥ न भस्येमासिशुक्लायाञ्चतुर्त्थ्यांम्ममजन्मनि ॥ २०३ ॥ दूर्व्वाभिर्न्नामभिः पूजान्तर्प्पणँव्विधिवच्चरेत् ॥ अष्टद्रव्यैर्व्विशेषेणजुहुयाद्भक्तिसय्युतः॥२०४॥तस्येप्सितानिसर्व्वाणिसिद्धयन्त्यत्रनसंशयः ॥ इदम्प्रजप्तम्पठितम्पाठितंश्रावितंश्रुतम् ॥ २०५ ॥ व्याकृतञ्चार्च्चितन्ध्यातँव्विमृष्टमभिनन्दितम् ॥ इहामुत्रचसर्व्वेषाँव्विश्वैश्वर्य्यप्रदायकम् ॥२०६॥ स्वच्छन्दचारिणाप्येषयेनसन्धार्य्यतेस्तवः ॥ संरक्ष्यतेशिवोद्भूतैर्गणैरध्युष्टकोटिभिः ॥ २०७ ॥ पुस्तकेलिखितंस्तोत्रम्मन्त्रभूतम्प्रपूजयेत् ॥ तत्रसर्व्वोत्तमालक्ष्मीः सन्निधत्तेनिरन्तरम् ॥ २०८ ॥ दानैरशेषैरखिलैर्व्व्रतैश्चतीर्त्थैरशेषैस्सकलैर्म्मखैश्च ॥ नतत्फलँव्विन्दतियद्गणेशसहस्रनाम्नांस्मरणेन सद्यः ॥ २०९ ॥ एतन्नाम्नांसहस्रम्पठतिदिनमणौप्रत्यहम्प्रोज्झिहाने सायम्मध्यन्दिनेवात्रिषवणमथवासन्ततँव्वाजनोयः ॥ स स्यादैश्वर्य्यधुर्य्यःप्रभवतिवचसाङ्कीर्त्तिमुच्चैस्तनोति प्रत्यूहंहन्ति विश्वँव्वशयतिसुचिरँव्वर्द्धतेपुत्रपौत्रैः ॥ २१० ॥ अकिञ्चनोप्येकचित्तोनियतोनियताशनः ॥ जपेत्तुचतुरोमासान्गणेशार्च्चनत त्परः ॥ २११ ॥ दरिद्रतांसमुन्मूल्यसप्तजन्मानुगामपि ॥ लभतेमहतींल्लक्ष्मीमित्याज्ञापारमेश्वरी ॥ २१२ ॥ आयुष्यँव्वीतरोगङ्कुलमतिविमलंसम्पदश्चार्त्तदानाः कीर्त्तिर्न्नित्यावदाताभणिति रभिनवाकान्तिरव्याजभव्या ॥ पुत्रास्सन्तःकलत्रङ्कुणवदनिमतँय्यद्यदेतच्चसत्यन्नित्यँय्यः स्तोत्रमेतत्पठति गणपतेस्तस्यहस्ते समस्तम् ॥ २१३ ॥ ॐगणञ्जयोगणपतिर्हेरम्बोधरणीधरः ॥ महागणपतिर्ल्लक्षप्रदःक्षिप्रप्रसादनः ॥ २१४ ॥ अमोघसिद्धिरमितोमन्त्रश्चिन्तामणिर्न्निधिः ॥ सुमङ्गलोबीजमाशापूरकोवरदःशिवः ॥ २१५ ॥ काश्यपोनन्दनोवाचासिद्धोदुण्ढिर्व्विनायकः॥

मोदकैरेभिरत्रैकविंशत्यानामभिः पुमान् ॥२१६॥ यःस्तौतिमद्भ तमनाःममाराधनतत्परः ॥ स्तुतोनाम्नांसहस्रेणतेनाहंनात्रसं शयः ॥ २१७ ॥ नमोनमस्सुरवरपूजिताङ्घ्रयेनमोनमोनिरुप ममङ्गलात्मने ॥ नमोनमोविपुलकरैकसिद्धयेनमोनमः करिकल भाननायते ॥ २१८ ॥ किङ्किणीगणरणितस्तवचरणः प्रकटि तगुरुमितिचारित्रगणः ॥ मदजललहरिकलितकपोलः शमयतुदु रितङ्गणपतिनृपनामा ॥ २१९ ॥ इतिश्रीगणेशसहस्रनामस्तो त्रंसम्पूर्णम् ॥ ७ ॥

इति गणेशतन्त्रं समाप्तम् ।

